UNIVERSITY OF TORONTO
3 1761 00670828 3

Lakṣmīnṛsiṃha Śāstrī
Nyāyenduśekharam

B
132
N8L35
19--

Nyayendusekharam

॥ श्रीः ॥

# ॥ न्यायेन्दुशेखरम् ॥

## (ब्रह्मानन्दीयमण्डनम्)

श्रीमन्महिशूरमहाराजास्थानधर्माधिकारिणां पण्डितसार्व-
भौमानां शतकोट्याद्यनेकप्रबन्धप्रणेतॄणां कुणिगल्
रामशास्त्रिणां पुत्रेण महाराजास्थानधर्माधिकारि-
पण्डितपुण्डरीककुणिगल् लक्ष्मीनृसिंहशास्त्रिणा
विरचितम् ॥



श्रीरङ्गम्
श्रीवाणीविलासमुद्रायन्त्रालयः

Lakṣmīnṛsiṃha Śāstri

॥ श्रीः ॥

# ॥ न्यायेन्दुशेखरम् ॥

Nyayendusekharam


## (ब्रह्मानन्दीयमण्डनम्)

श्रीमन्महिशूरमहाराजास्थानधर्माधिकारिणां पण्डितसार्व-
भौमानां शतकोट्याद्यनेकप्रबन्धप्रणेतॄणां कुणिगल्
रामशास्त्रिणां पुत्रेण महाराजास्थानधर्माधिकारि
पण्डितपुण्डरीककुणिगल् लक्ष्मीनृसिंहशास्त्रिणा
विरचितम् ॥




श्रीवाणीविलाससमुद्रायन्त्रालयः
श्रीरङ्गम् ॥
[19--?]

B
132
N8L35
19--




922302

॥ श्रीः ॥

श्रीरामः समर्थः ॥ श्रीगुरुभ्यो नमः ॥

# ॥ न्यायेन्दुशेखरम् ॥

## (ब्रह्मानन्दीयमण्डनम्)

न्यायभास्करदन्तानां भञ्जकं रञ्जकं सताम् ।
न्यायेन्दुशेखरं कुर्वे नत्वा बालेन्दुशेखरम् ॥

इह खलु परमपुरुषार्थसाधनमात्मतत्त्वज्ञानमामनन्ति न्यायवेदान्तनिष्णाताः । तच्चात्मतत्त्वं कर्तृत्वभोक्तृत्वादि-निखिलानर्थविरहितसच्चिदानन्दघनप्रत्यगभिन्नब्रह्मात्मकमिति तन्निरूपणीयम् । निरूपणं च साधकप्रदर्शनबाधकनिराकरणाभ्याम् । तत्र च साधिकाः 'असङ्गो ह्ययं पुरुषः,' 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सदेव सौम्येदमग्र आसीत्' 'नेह नानास्ति किंचन,' 'नात्र काचन भिदाऽस्ति,' 'एकमेवाद्वितीयम्,' 'तत्त्वमसि' इत्यादयः निश्चिततात्पर्यका

उपनिषद एव । तत्र च निश्चिततात्पर्यकप्रमाणान्तरविरोधे तात्पर्यानिश्चयात् तदविरोधस्तावदुपपादनीयः । स च यावत्प्रत्यक्षादिग्राह्यद्वैतजातस्य पारमार्थिकत्वं न निराक्रियते तावदुपपादः इति तस्य मिथ्यात्वमुपपादनीयम् । अतस्तदेवादौ स्वपक्षसाधनपरपक्षनिराकरणाद्युपन्यासेन प्रपञ्च्यत । तथाहि— तत्र विप्रतिपत्तिः ब्रह्मप्रमातिरिक्ताबाध्यं सत्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्या न वा । विमतं मिथ्या न वेत्यादि । अत्र च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे अवच्छेदकावच्छेदेन अनुमितौ सामानाधिकरण्येन साध्यसिद्धेः प्रतिबन्धकत्वे विशेषणत्रयस्यापि सार्थक्यं संभवति । तथाहि— चिद्भिन्नत्वादिरूपपक्षतावच्छेदकाक्रान्ते शुक्तिरूप्यादौ मिथ्यात्वरूपसाध्यस्य सिद्धत्वेन सिद्धसाधनवारणायाबाध्यान्तम् पक्षविशेषणम् । उक्तं च गादाधर्याम्—पक्षतामन्थे अत एवातिप्राचीना अवच्छेदकावच्छेदेनानुमितावपि अंशतः सिद्धसाधनस्य दोषत्वमङ्गीकुर्वन्तो ध्वनिव्यावर्तनाय वर्णात्मकत्वं शब्दानित्यत्वानुमाने पक्षे निवेशयन्तीति । तुच्छे ब्रह्मणि च बाधवारणाय अर्हान्तभिन्नान्तयोरुपादानम् । अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे सामानाधिकरण्येन साध्यसिद्धौ न सिद्धसाधन-

मिति नव्यमतादरे तु अबाध्यान्तं विशेषणं नोपादेयमेव। सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे तु उक्ताबाध्यत्वमात्रं पक्षविशेषणम्। यद्यपि शुक्तिरूप्यादौ सिद्धसाधनं न तार्किकस्य न वा आनन्दतीर्थीयस्य, विप्रतिपत्तौ तार्किकेण तस्य मिथ्यात्वानङ्गीकारात् आनन्दतीर्थीयेन तस्यासद्विलक्षणत्वानङ्गीकारेणाहान्तविशेषणेनैव तद्वारणात्। तथापि भास्करादिभिः शुक्त्यादौ सत्यरजतादिर्जायत इत्यङ्गीकारात् तदनुयायिना केन चिन्नेदं रजतमित्यादिबाधदर्शनात् मिथ्येति वक्तुं शक्यमिति तं प्रति विप्रतिपत्तौ अबाध्यान्तं देयम्। यत्तु कञ्चन वादिनं प्रकल्प्य प्रकल्पितवादिमते सिद्धसाधनवारकतया उक्तविशेषणसार्थक्ये ब्रह्मप्रमातिरिक्ताबाध्यभूतमिथ्याभूतरजतवादिनोऽपि कल्पनसंभवेन तन्मते सिद्धसाधनवारणार्थं विशेषणान्तरदानप्रसङ्गेनानवस्थापातात्। तादृशविशेषणान्तरविशिष्टस्यापि मिथ्याभूतरजतस्य केनचित्कल्पितेन वादिनाऽङ्गीकारसंभवात् इति। तन्न; ब्रह्मप्रमातिरिक्ताबाध्यस्य बाधदर्शनरूपप्रयोजकमन्तरेण एतादृशानुमानात्पूर्वं मिथ्यात्वस्य वक्तुमशक्यत्वेन तादृशवादिकल्पनस्यैवासंभवेनानवस्थाया अनवकाशात्। ब्रह्मप्रमातिरिक्ताबाध्यब्रह्माभिन्नवस्तुनो मिथ्यात्वाङ्गीकर्तुः वादिनोऽद्वै-

तितुल्यत्वेन तं प्रति विवादस्यैवाभावाच्च । ननु अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेः प्रतिबन्धकत्वमिति प्राचीनमताऽदरेऽपि अबाध्यान्तविशेषणस्य सार्थक्यं न संभवति । तथाहि यथाश्रुते चिद्भिन्नविशेषणेऽपि प्रातिभासिकचिद्भेदमादाय ब्रह्मणि बाधतादवस्थ्येन स्वसमानसत्ताकचिद्भेदवत्त्वस्य विलक्षणीयतया प्रातिभासिकशुक्तिरूप्यनिष्ठचिद्भेदस्य व्यावहारिकत्वेन स्वसमानसत्ताकचिद्भेदवत्त्वरूपविशेषणाभावादेव तत्र सिद्धसाधनवारणादिति चेन्न । अभावस्याधिकरणस्वरूपत्वाङ्गीकारेण प्रातिभासिकनिष्ठचिद्भेदस्य प्रातिभासिकरूपतया स्वसमानसत्ताकचिद्भेदस्यापि तत्र सत्त्वेन तादृशविशेषणेन तद्वारणासंभवात् । न च बाधवारणमपि तद्विशेषणेन न संभवतीति वाच्यम् । प्रातिभासिकचिद्भेदस्याधिकरणस्वरूपत्वानङ्गीकारात् । वस्तुतस्तु प्रातिभासिकचिद्भेदमादाय बाधवारणाय स्वान्यूनसत्ताकचिद्भेदस्यैव निवेश इत्यभिप्रायेणाबाध्यन्तविशेषणोपादानान्नानुपपत्तिरिति ध्येयम् । यत्तु इदं रजतं ब्रह्मप्रमातिरिक्ताबाध्यं इति भ्रमे तादृशाबाध्यत्वविशिष्टरजतस्यैवानिर्वचनीयस्योत्पत्त्या उक्तविशेषणेन तादृशरजताबारणात् उक्तसिद्धसाधनस्य दुर्वारता । न चोक्तभ्रमे तादृशा-

बाध्यत्वविशिष्टस्य शुक्त्यादेरेव तादात्म्येन भानं न तु विशिष्टरजतोत्पत्तिरिति नोक्तदोष इति वाच्यम्। अन्योन्यस्मिन्नन्योन्यात्मकतां अन्योन्यधर्माध्याध्यस्येत्यध्यासभाष्यरीत्या तादात्म्येन धर्म्यध्यासस्थले धर्मसंसर्गस्यापि अध्यासावश्यकतया उक्तविशेषणेन रजताबारणादिति तन्न। सिद्धान्ते विशिष्टस्योत्पत्त्यनभ्युपगमेन अबाध्यत्वविशिष्टरजतस्योत्पत्त्यनभ्युपगमात् अबाध्यत्वविशिष्टशुक्त्यादितादात्म्यस्याध्यस्तत्वेन अबाध्यत्वसंसर्गस्याध्यस्तत्वात् पक्षतावच्छेदकसंसर्गस्य तादृशरजतादौ संभवेऽपि स्वसमानसत्ताकसंसर्गस्यैव पक्षतावच्छेदकतावच्छेदकत्वेन तादृशरजतादिनिष्ठोक्ताबाध्यत्वसंसर्गस्य प्रातिभासिकत्वेनाबाध्यत्वस्य च व्यावहारिकत्वेन स्वसमानसत्ताकसंसर्गेण पक्षतावच्छेदकस्य शुक्तिरूप्यादिसाधारण्यविरहेण सिद्धसाधनानवकाशात्। ननु ब्रह्मण्यारोपिते क्षणिकत्वे सिद्धसाधनं दुर्वारं तस्य क्षणिकत्वाभावप्रकारकब्रह्मज्ञानबाध्यतया ब्रह्मप्रमातिरिक्ताबाध्यत्वादिति चेन्न। ब्रह्मप्रमातिरिक्ताबाध्यत्वेनेन ब्रह्मान्यविषयकज्ञानाबाध्यत्वस्य विवक्षितत्वेन ब्रह्मान्यक्षणिकत्वाभावप्रकारकज्ञानबाध्यत्वेन तत्र सिद्धसाधनानवकाशात्। यत्तु एवं सत्याश्रयासिद्धिः प्रपञ्चस्य, ब्रह्मान्यविषयकज्ञानबाध्यत्वात्।

अध्यस्तं प्रति अधिष्ठानसाक्षात्कारत्वेनैव बाधकत्वेन इयं शुक्तिः अयं घटः इत्यादि समूहालम्बनस्य शुक्तिरूप्यबाधकतावत् अहं ब्रह्म, घटो विनाशीत्यादिसमूहालम्बनस्यापि प्रपञ्चबाधकत्वे बाधकाभावात् । न हि शुक्तिरूप्यादिस्थलेऽधिष्ठानान्याविषयकज्ञानस्यैव बाधकत्वमिति संभवति । इयं शुक्तिरित्यसमूहालम्बनस्यापि चाक्षुषस्य शुक्तित्वतत्समानाधिकरणसंख्यापरिमाणादिविषयकत्वेनाबाधकत्वप्रसङ्गादिति, तत्तुच्छम् अहं ब्रह्म, घटो विनाशीत्यादिज्ञानस्य आहार्यत्वेन शुक्तित्वाभाववतीयंशुक्तिरित्यादिज्ञानस्येवाबाधकत्वात् । न च तादृशज्ञानस्याहार्यत्वमेव कथमिति वाच्यं, द्वैताद्वैतविषयितयोर्विरोधात् । न च विरोध एव कुत इति वाच्यम् । अद्वितीयब्रह्मसाक्षात्कारात्पूर्वमद्वैतत्वेन ब्रह्मविषयकानुभवजन्योद्बुद्धसंस्कारावश्यकत्वेन तस्यैव द्वैतधीविरोधित्वात् । यथा ह्रदे वन्हिप्रकारताशालिबुद्धिं प्रति ह्रदो वन्ह्यभाववान् , इत्युद्बुद्धसंस्कारस्य प्रतिबन्धकत्वेन तादृशसंस्काराव्यवहितोत्तरजायमानज्ञानस्य ह्रदे वन्हिप्रकारताकत्वाभावनियमः । तथा द्वैताभाववद्ब्रह्मेत्याकारकोद्बुद्धसंस्काराव्यवहितोत्तरजायमानाद्वितीयत्वोपलक्षितब्रह्मविषयकसाक्षात्कारस्य तत्प्रतिबध्यतावच्छेदकीभूतद्वैतविशेष्यतानिरूपि-

तसत्तातादात्म्यप्रकारताकत्वाभावनियमेन तदभावे तद्व्याप्य-भूतद्वैतविषयकत्वाभावनियमात्। सिद्धान्ते सदन्यविषयतायाः सत्तादात्म्यविषयतानिरूपितत्वमिति नियमाङ्गीकारात्। यत्तु द्वितीयाभावो ब्रह्मनिष्ठ इत्याद्युद्बुद्धसंस्कारस्य द्वितीयत्वावच्छिन्ने सत्तादात्म्यावगाहिज्ञानप्रतिबन्धकतायाः प्रामाणिकत्वेऽपि घटत्वाद्यवच्छिन्ने सत्तादात्म्यावगाहिधी-प्रतिबन्धकत्वासंभवेन अहं ब्रह्म घटो विनाशीत्यादिज्ञानस्य आहार्यत्वासंभवः। न च घटाभावो ब्रह्मनिष्ठ इत्याद्युद्बुद्ध-संस्कारोऽपि पूर्वमस्तीति वाच्यम्। दृश्यत्वव्याप्याः यावन्तो धर्माः तत्तद्धर्मावच्छिन्नाभावविशिष्टब्रह्मविषयकसंस्कारसत्वे प्रमाणाभावेन यद्धर्मावच्छिन्नाभावविषयकसंस्कारः पूर्वमसिद्धः तद्धर्मावच्छिन्ने सत्तादात्म्यावगाहिनः अहं ब्रह्मास्मि तद्धर्मावच्छिन्नः सन् इत्यादिसमूहालम्बनस्यानाहार्यस्य संभवादिति। तत्र सर्वथा मुमुक्षुणा प्रपञ्च-मिथ्यात्वस्य चिन्त्यमानतया यादृशयादृशधर्मावच्छिन्नस्य उपस्थितियोग्यत्वं वर्तते तादृशतादृशधर्मावच्छिन्ने सर्वत्रैव मिथ्यात्वनिश्चयसम्भवेन मिथ्यात्वघटकतया तत्तद्धर्मावच्छिन्नाभावस्य ब्रह्मणि निश्चयसंभवेन अखण्डब्रह्मसाक्षात्कारे उपस्थितियोग्यतादृशधर्मावच्छिन्नेऽपि सत्तादात्म्याव-

ग्राहनासंभवात् । यादृशधर्मावच्छिन्नविषयकज्ञानजनकसामग्री अद्वितीयब्रह्मसाक्षात्काराव्यवहितपूर्वमेव, न त्वन्यदा तादृशधर्मावच्छिन्नसत्वे च प्रमाणाभावात् । ब्रह्मणि द्वितीयत्वावच्छिन्नाभाववत्तानिश्चयस्य निखिलधर्मावच्छिन्ने सत्तादात्म्यावगाहिज्ञानं प्रति विरोधित्वानङ्गीकारेण एकमेवाद्वितीयम् इत्यादिश्रुतिवाक्यजन्यशाब्दबोधस्यानाहार्यत्वोपपादनं ग्रन्थकृतामविरुद्धम् । इत्थं च निवर्तकज्ञानस्य इतरविषयकत्वमप्रामाणिकमेव । अत एव विवरणे ' ननु ब्रह्मात्मानुभवद्वैतदर्शनयोः कुतः साहित्यमित्याशंक्य न वयं साहित्यं ब्रूमः किन्तु कदाचिदसम्प्रज्ञातात्मैकत्वदर्शनं कदाचित्प्रारब्धकर्मोपस्थापितदोषनिमित्तद्वैतदर्शनं चेति,' इत्युक्तम् । एवं च ब्रह्मान्यविषयकज्ञानाबाध्यत्वस्य प्रपञ्चे अबाधेन नाश्रयासिद्धिः । यदपि मिथ्यात्वानुमितेः तद्धर्मावच्छिन्नाधिकरणे तद्धर्मावच्छिन्नाभावविषयकत्वेनाहार्यत्वेऽपि यथा अज्ञानादिनिवर्तकत्वं तथा उक्तसमूहालम्बनस्याहार्यत्वेऽपि प्रपञ्चबाधकतासंभवादुक्ताश्रयासिद्धिः दुर्वारैवेति । तदपि न, मिथ्यात्वानुमितेराहार्यत्वस्यैवाभावात् । विरुद्धद्वयविषयकत्वे हि आहार्यत्वम् प्रकृते समानसत्ताकयोरेव भावाभावयोरेव विरोधात् । एकधर्मिविशेष्यकघटतदभावावगाहिज्ञा-

नस्याहार्यत्वेऽपि स्वाधिकरणे पारमार्थिकाभावप्रतियोगित्वावगाहिज्ञानस्य तदधिकरणनिष्ठतत्समानसत्ताकाभावप्रतियोगित्वाविषयकत्वेन संयोगे तदधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वज्ञानस्येव तस्यानाहार्यत्वोपपत्तेः। यदि च अज्ञानतत्कार्याविषयकस्यैव तदुभयनिवर्तकत्वादित्यद्वैतसिद्धिषङ्क्तिव्याख्यानावसरे अथवेत्यादिना अज्ञानतत्कार्यविषयकेत्यस्य आत्मांशे किंचिदविषयकज्ञानस्येत्यर्थः 'तमेव विदित्वा' इत्यादिश्रुतिस्तु 'एकधैवानुद्रष्टव्यम्' 'प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः' इत्यादि केवलात्मज्ञेयत्वपरश्रुत्या एकवाक्यतया तदंशे अन्याविषयकज्ञानस्य मोक्षहेतुत्वपरा। न्यायसिद्धस्य समानविषयकत्वेनाज्ञाननिवर्तकत्वस्य तयाऽनुवादात्। अत एव—

'न बुद्धिं मर्दयन्द्रष्टो घटतत्त्वस्य वेदिता।
उपमृद्नाति चेद्बुद्धिं ध्याताऽसौ न तु तत्त्ववित्॥'

इति ध्यानदीपे श्रीविद्यारण्यैरुक्तम्। बुद्धेर्मर्दनं इतरविषयकत्वविघटनं तच्च ध्यानोपयुक्तम्, अन्यथा इतरविषयकज्ञानस्योत्पत्तौ ध्यानत्वस्य इतरविषयकज्ञानाभावविशिष्टज्ञानधारात्वस्य हानापत्तेः न तु तत्त्ववेदनोपयुक्तं इतरविषयक-

स्यापि तत्वविषयकत्वसंभवात् । पराभिमतबाधसामग्र्याः प्रतिबन्धकत्वस्य परैरभ्युपगमेऽपि अखण्डब्रह्मधीसामग्र्याः तन्मतेऽलीकत्वेन तत्प्रतिबन्धकत्वस्याकल्पत्वात् । तत्कल्पापेक्षया सिद्धान्ते गौरवापत्त्या तत्र प्रयोजनाभावेन च पूर्वोक्तप्रतिबन्धकत्वस्याऽभावे इतरविषयकस्याप्यनाहार्यत्वसंभवात् । विवरणादिवाक्यं तु ब्रह्मज्ञानोत्तरमुत्तरं प्रारब्धभोगाभावकाले द्वैतप्रत्ययोत्पत्त्यभावपरं याजनीयमिति गुरुचन्द्रिकायां लघुचन्द्रिकायां चोक्तद्वितीयपक्षे ब्रह्मान्यविषयकज्ञानाबाध्यत्वनिवेशे असिद्धिर्दुर्वारेवेति मन्यते ; तदा ब्रह्मान्यविषयकत्वावच्छिन्नप्रयोजकतानिरूपित प्रयोज्यतावत्त्वस्वोपादानान्यतरत्वावच्छिन्नाभावकान्यत्वस्यैव ब्रह्मान्यविषयकज्ञानाबाध्यत्वार्थत्वात् । शुक्तिरूप्यादौ ब्रह्मान्यशुक्तिविषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत्त्वस्य शुक्तिरजततन्मूलभूताज्ञानान्यतरत्वावच्छिन्नाभावे सत्वेन तादृशाभावकतया तादृशविशेषणस्याभावात् । ब्रह्मण्यारोपितक्षणिकत्वेऽपि तत्क्षणिकत्वतन्मूलभूताज्ञानान्यतरत्वावच्छिन्नाभावस्य ब्रह्मान्याक्षणिकत्वविषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत्त्वया नोक्तविशेषणप्राप्तिः । यत्तु नानाज्ञानपक्षे उक्तविशेषणेन तद्वारणेऽपि एकाज्ञानपक्षे तद्वारणं

न संभवति तत्पक्षे शुक्तिज्ञानकालेऽपि शुक्तिरूप्योपादानाज्ञानसत्वादिति, तन्न। एकाज्ञानपक्षे ब्रह्मान्यविषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत्स्वाभावकान्यत्वस्यैव निवेशेन शुक्त्यादिज्ञानकाले तादृशाज्ञानसत्वेऽपि क्षतिविरहात्। न च तथा सति यादृशशुक्तिरजतादेः न बाधज्ञानेन नाशः, अपि तु तद्विषयकज्ञाननाशसामग्र्यादिना नाशः तादृशरजतादेः यत्किंचिद्विषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत्स्वाभावकान्यतया निरुक्तविशेषणाक्रान्तत्वेन तत्र सिद्धसाधनमिति वाच्यम्। ब्रह्मान्यविषयकत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावत्त्वमित्यादेः तादृशप्रयोज्यत्वाभावत्वविषयकज्ञाननाशकसामग्रीनाश्यत्वाभावोभयाभाववत्स्वाभावकान्यत्वार्थविवक्षया तत्र सिद्धसाधनविरहात्। नन्वेवमपि ब्रह्मत्वोपलक्षितानुयोगिकज्ञानत्वोपलक्षितप्रतियोगिकभेदे ब्रह्म न ज्ञानमिति भ्रमसिद्धे सत्यं ज्ञानमित्यादिशोधकवाक्यजन्यधीबाध्ये सिद्धसाधनस्य दुर्वारत्वम् इति चेत् न; जीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयताशून्यज्ञानबाध्यत्वे उक्तविशेषणतात्पर्येण दोषाभावात्॥ तथाहि— जीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयताशालिज्ञानं तत्त्वमसीत्यादिमहावाक्यजन्यनिर्विकल्पकात्मकापरोक्षज्ञानं

तच्छून्यं च ब्रह्मत्वज्ञानत्वाद्युपलक्षितविषयकं सत्यं ज्ञानमित्यादिशोधकवाक्यजन्यं निर्विकल्पकात्मकं ज्ञानं तद्बाध्यत्वस्य ब्रह्मत्वोपलक्षितानुयोगिकज्ञानत्वोपलक्षितप्रतियोगिकभेदे सत्वेन तद्धारणात् । यत्तु समानाकारकज्ञानेषु विषयताभेदस्याप्रामाणिकतया सत्यं ज्ञानमित्यादिवाक्यजन्यबोधस्य तत्त्वमसीत्यादिवाक्यजन्यबोधात् अविलक्षणाकारतया तादृशबोधस्य जीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयताकत्वानपायात् उक्तसिद्धसाधनस्य दुर्वारत्वमिति, तच्च सिद्धान्ताज्ञानविजृम्भितमेव । सत्यं ज्ञानमित्यादिवाक्यजन्यबोधस्य तत्त्वमसीत्यादिवाक्यजन्यबोधस्य च समानाकारकत्वस्यैवाभावात् । न च द्विविधप्रत्यक्षस्यापि केवलब्रह्ममात्रविषयकत्वानिरूप्यनिरूपकभावभेदेनैव विषयताभेदस्य प्रामाणिकत्वात् उक्तप्रत्यक्षयोः समानाकारकत्वं निरपवादमिति वाच्यम् ; निरूप्यनिरूपकभावभेदस्यैव सत्वात् । तथाहि— यथा द्रव्यत्वघटत्वाद्युपलक्षितविषयकज्ञाने जाते घटत्वाद्युपलक्षिते द्रव्यत्वाद्युपलक्षितभेदविषयकज्ञानं न जायते जायते च पटत्वाद्युपलक्षिते द्रव्यत्वाद्युपलक्षितभेदविषयकं ज्ञानमिति अनुभवसिद्धम् ॥ तदनुरोधेन च विषयतावैलक्षण्यं वाच्यम् । तच्च निरूप्यनिरूपकभावमन्तरा दुर्निरूपितमिति पूर्वज्ञानीयघटत्वादिविषयता-

निरूपितत्वं स्वीकरणीयम् । न च निर्विकल्पकत्वहानिरिति वाच्यम् ; स्वनिरूपितविशेष्यत्वप्रकारत्वाश्रयनिरूपितविषयता-शालिज्ञानत्वस्यैव निर्विकल्पकत्वरूपत्वेन दोषाभावात्। तथा सत्यं ज्ञानमित्यादिवाक्यजन्यज्ञाने जाते ज्ञानत्वोपलक्षिते सत्यत्वोपलक्षितप्रतियोगिकभेदविषयकज्ञानं न जन्यते जन्य-ते च जीवत्वोपलक्षिते ब्रह्मत्वोपलक्षितप्रतियोगिकभेदवि-षयकं ज्ञानमित्यनुभवानुरोधात् तत्तत्प्रातिभासिकादिनिवर्त-कतावच्छेदकत्वेन तत्तन्निष्ठविषयतयोः भेदावश्यकत्वेन पूर्व-ज्ञानीयसत्यत्वज्ञानत्वादिविषयतानिरूपितत्वस्य सत्यं ज्ञान-मित्यादिवाक्यजन्यज्ञानीयब्रह्मविषयतायां, पूर्वज्ञानीयजीवत्व-ब्रह्मत्वादिविषयतानिरूपितत्वं तत्त्वमसीत्यादिवाक्यजन्यज्ञा-नीयविषयतायां च अङ्गीकार्यमिति, न च ज्ञानान्तरीयवि-षयतानिरूपितत्वं ज्ञानान्तरीयविषयतायां कुत्रापि न दृष्ट-मिति वाच्यम् ॥ व्युत्पत्तिवादे तृतीयाकारके द्वित्वनाश-कालीनायां द्वे द्रव्ये इत्यादिबुद्धौ द्वित्वविशिष्टविषयकत्वस्य पूर्वज्ञानीय द्वित्वविषयतानिरूपितत्वमादाय भट्टाचार्यैरेवोप-पादितत्वात् ॥ न च तत्र समानकालीनज्ञानीयविषयतयोः निरूप्यनिरूपकभावः प्रामाणिकः प्रकृते च 'सामानाधि-करण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेव विशेषणे-

तरतया पश्चाद्विरोधोद्भवः । उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मधीः' इत्यादिसंक्षेपशारीरकोक्तरीत्या विशिष्टज्ञानस्य व्यवहितत्वात् न संभवतीति वाच्यम् । विभिन्नकालीनत्वस्य निरूप्यनिरूपकभावस्वीकारे अबाधकत्वात् ॥ यदि दृष्टान्ते समानकालीनत्वं दृष्टमित्येतावन्मात्रेण तस्यापि प्रयोजकत्वं स्वीक्रियते तदा दृष्टान्तनिष्ठ तद्व्यक्तित्वादेरपि प्रयोजकतापत्त्या दृष्टान्तदार्ष्टान्तिकभावविलोपप्रसङ्गात् । तस्मात्समानकालीनज्ञानीयत्वं न निरूप्यनिरूपकभावप्रयोजकम् । अत एव च न हि दृष्टान्ते सर्वसाम्यमित्यादिप्रामाणिकव्यवहारः॥ विवेचितं चेदं शास्त्रारम्भसमर्थनादौ भट्टैरम्बकैः । यद्यपि जीवब्रह्माभेदवादिनः तान्त्रिकस्य जीवत्वब्रह्मत्वाद्युपलक्षितविषयता नानुमता तथापि तादृशनिरूपितत्वद्वयाभाववत्स्वविषयतासामान्यकज्ञानाबाध्यत्वे उक्तविशेषणतात्पर्याभ्युपगमेन तादृशज्ञानस्य च तन्मते प्रसिद्धत्वाददोषः इति ॥ यदपि ब्रह्मान्यविशिष्टान्यत्वमेवोक्तविशेषणार्थः वैशिष्ट्यं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन स्वाधिकरणत्वं स्वविषयकाप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वसंबन्धेन, भेदप्रतियोगितावच्छेदकता स्वनिष्ठाव-

च्छेदकताकप्रतियोगिताकभेदवत्वसंबन्धेन, स्वनिष्ठावच्छेदकता स्वपूर्वत्वस्वप्रयोजकाज्ञानसमानकालीनत्वान्यतरसंबन्धेनेत्याशंक्य नानाज्ञानपक्षे उक्तविशेषणेन वारणेऽपि एकाऽज्ञानपक्षे तदवारणादिति समाधानोपवर्णनं तदप्ययुक्ततरमेव, भेदप्रतियोगितावच्छेदकतायां स्वपूर्वत्वसंबन्धमात्रनिवेशेष्युपपत्त्या स्वप्रयोजकाऽज्ञानसमानकालीनत्वनिवेशनस्य व्यर्थत्वात् ॥ तादृशव्यर्थविशेषणं प्रक्षिप्य एकाज्ञानपक्षे तद्वारणासंभवोपपादनस्य सुतरामसङ्गतत्वाच्च ॥ न च यत्किंचिद्घटादिविषयकाद्यज्ञानस्यापक्षतावारकं तत् तत्र हि तद्व्यक्तिविषयकज्ञानत्वस्य तादृशाद्यज्ञानमारभ्योत्तरोत्पन्नज्ञानान्तरेष्वेव सत्वेन तत्र च तज्ज्ञानपूर्वत्वसंबन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वस्य नियमेन सत्वेन ब्रह्मान्यतद्घटविशिष्टत्वादिति वाच्यम् ॥ तथापि स्वप्रयोजकाज्ञानसमानकालीनत्वमात्रनिवेशेनैवोपपत्तौ स्वपूर्वत्वनिवेशनस्य व्यर्थत्वात् । स्वसंस्कारसमानकालीनत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वस्यैव व्यापकताघटकसंबन्धत्वेन निवेशसंभवात् । एकाज्ञानपक्षेऽपि शुक्तिरूप्यादिस्थले स्वप्रयोजकाज्ञानसमानकालीनत्वसत्वेऽपि शुक्तिरूप्यसंस्कारादेः

निवृत्तत्वेन स्वसंस्कारेत्यादिसंबन्धेन व्यापकत्वानपायात् तद्वारणेन एकाज्ञानपक्षे तद्वारणकथनस्यायुक्तत्वात् । सत्कार्यवादाभ्युपगमेन घटादेर्नाशेऽपि तत्संस्कारस्य सत्वात् । तदुक्तम् लघुचन्द्रिकायाम्— 'सर्वदा व्यवहारकाले कार्यस्य तादात्म्यापन्नं किंचित् कार्यरूपमस्ति तत्त्वदर्शनं विना तदुच्छेदासंभवात् इति सत्कार्य[illegible] सांख्यानामिव अस्माकमपि' इत्यादिना ॥ यत्तु, जीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयतायाः सत्यत्वज्ञानत्वाद्युपलक्षितब्रह्मविषयतायाश्च भेदाभावमवष्टभ्य महावाक्यजन्यतावच्छेदकीभूतविषयताविशिष्टान्यत्वमेवोक्तविशेषणार्थः, वैशिष्ट्यघटकव्याप्यत्वव्यापकत्वादेर्घटकसंबन्धः पूर्ववदेव, स्वाधिकरणत्वं परं स्वनिरूपकेत्यादिसंबन्धेनेत्यादिकं ब्रह्मत्वोपलक्षितानुयोगिताके ज्ञानत्वोपलक्षितप्रतियोगिताकभेदे सिद्धसाधनान्निरस्तमित्युक्तिः, सापि भ्रममूला पूर्वोक्तवैयर्थ्यादिदोषात् आशङ्काया अयुक्तत्वात्, तादृशविषयतयोर्भेदस्य पूर्वं व्यवस्थापितत्वेन तत्र दूषणाभिधानस्याप्ययुक्तत्वात् । यद्यपि महावाक्यानां परस्परबोधे व्यभिचारवारणाय अव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे विषयतानिवेशे प्रयोजनाभिरहेण महावाक्यजन्यबोधीयविषयताया अपि तादृशजन्यतानवच्छेदकत्वेन आश्र-

यासिद्धिरिति दूषणान्तराभिधानं तदप्ययुक्तम् ॥ महावाक्य-निरूपितजन्यतानवच्छेदकेत्यत्र महावाक्यजन्यत्वाभाववद्वृत्तित्वस्य विषयतायां निवेशेनैवोपपत्तेः । वस्तुतस्तु अव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ निवेशेऽपि विषयता-विशेषस्य कार्यतावच्छेदकत्वमावश्यकं, अन्यथा स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन तत्तन्महावाक्यनिष्ठतत्तदानुपूर्वीप्रकारताशालिज्ञानविशिष्टत्वाव-च्छिन्नं प्रति तत्तदानुपूर्वीप्रकारताशालिज्ञानत्वेन कारणत्वाङ्गीकारे यत्र महावाक्यनिष्ठानुपूर्वीप्रकारताशालिज्ञानं तादृशानुपूर्व्याभाववति तादृशानुपूर्वीप्रकारताशालीति स्वांशे अप्रामाण्यावगाहि ; घटो द्रव्यमित्यादिवाक्यान्तरनिष्ठानुपूर्वीविषयकं च, तत्र तदनन्तरं जायमानघटो द्रव्यमित्यादिशाब्दबोध-स्यापि स्वसामानाधिकरण्येत्यादिसम्बन्धेन महावाक्यज्ञान-विशिष्टतया अप्रामाण्यज्ञानास्कन्दिततादृशानुपूर्वीप्रकारताशालिज्ञानात् तादृशशाब्दबोधवारणाय निवेशनीयाप्रामाण्यज्ञानानास्कन्दितत्वविशिष्टतथाविधानुपूर्वीप्रकारताशालिज्ञानस्य च तत्पूर्वभावेन व्यभिचारात् ॥ न च कार्यतावच्छेदककोटावपि तत्तद्ज्ञानप्रामाण्यज्ञानाभावविशिष्टतादृशानुपूर्वी-प्रकारताशालिज्ञानस्यैव निवेशान्नोक्तानुपपत्तिरिति वाच्यम् ॥

अनन्त तत्तदप्रामाण्यज्ञानाभावानां कार्यतावच्छेदककोटौ निवेशापेक्षयाविषयताविशेषनिवेशनस्यैव लघुत्वेन न्याय्यत्वात् ॥ न च एकविधमहावाक्यनिष्ठानुपूर्वीप्रकारताशालिज्ञानं स्वांशेऽप्रमाण्यावगाहि महावाक्यान्तरनिष्ठानुपूर्वीविषयकं च, तादृशज्ञानोत्तरं जायमानजीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयताशालिज्ञाने विषयताविशेषनिवेशेऽपि व्यभिचारापरिहारेण कार्यतावच्छेदके तत्तदप्रामाण्यज्ञानाभावस्य निवेशनीयतया विषयताविशेषनिवेशनमनर्थकमेवेति वाच्यम् । अप्रामाण्यानामननुगततया तत्तदप्रामाण्यज्ञानाभावस्यैव निवेशनीयतया एतादृशाप्रामाण्यज्ञानाभावानां कार्यतावच्छेदककोटिप्रवेशस्योभयमते साम्येऽपि पूर्वोक्तघटो द्रव्यमित्यादिशाब्दबोधसामग्रीकालीनतथाविधाऽप्रामाण्यज्ञानाभावानामनिवेशेन लाघवानपायात् ॥ यत्तु महावाक्याजन्यज्ञानविशिष्टान्यत्वमेव उक्तविशेषणार्थः ज्ञानवैशिष्ट्यं च, आधेयतासम्बन्धेन, आधेयता च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदत्वसम्बन्धेन, स्वनिष्ठावच्छेदकता च स्वपूर्वत्वस्वप्रयोजकाज्ञानसमानकालीनत्वान्यतरसम्बन्धावच्छिन्ना ; महावाक्यत्वं च जीवब्रह्माभेदतात्पर्यकत्वेनाद्वैत्यभिमतत्वं । तथा च ब्रह्मत्वोपलक्षिते ज्ञानत्वोपलक्षितप्रतियोगिताकभेदस्य महा-

वाक्याजन्यं यच्छोधकवाक्यजन्यज्ञानं उक्ताधेयतासम्बन्धेन तद्विशिष्टत्वान्न सिद्धसाधनमित्याशङ्क्य, तथा सति तत्त्वमसी-त्यादिवाक्यजन्यनिर्विकल्पकधीकाले विद्यमानं यत् घटादि-ज्ञानं उक्ताधेयतासम्बन्धेन प्रपञ्चस्य तद्विशिष्टत्वेन आश्रया-सिद्धिरिति दूषणाभिधानं तदयुक्तम् , पूर्ववदत्रापि स्वप्रयोज-काज्ञानसमानकालीनत्वमात्रस्य स्वनिष्ठावच्छेदकतावच्छेदक-त्वेनैवोपपत्तौ स्वपूर्वत्वस्य तद्घटकतया निवेशे प्रयोजनविर-हेण आशङ्काया अयुक्तत्वात् । कदाचिदद्वैतदर्शनं कदाचिद्वै-तदर्शनं न युगपदेवोभयं सन्तमसबहुलालोकयोरिव विरो-धादिति विवरणोक्तेः । तत्काले घटादिज्ञानासम्भवेन तत्र दूषणाभिधानस्यापि अयुक्तत्वात् । न च तथापि तत्काले सत्यादिशोधकवाक्यजन्यधीसम्भवेन तादृशधियमादाय आ-श्रयासिद्धिर्दुर्वारेति वाच्यम् ; महावाक्यजन्यबोधस्य तत्पदार्थशोधकवाक्यभूतसत्यमित्यादिवाक्यजन्यबोधप्रयोज्य-त्वेन पूर्वं तदावश्यकतया तदनन्तरं महावाक्यजन्यबोध-काले पुनश्च तच्छाब्दबोधस्यासंभवात् । उक्तं च तत्र तत्र शाब्दबुद्धावपि सिद्धेः प्रतिबन्धकत्वमिति । यदपि अव्यव-हितोत्तरत्वसंबन्धेन महावाक्यविशिष्टान्यत् यज्ज्ञानं उक्ताधे-यतासम्बन्धेन तद्विशिष्टान्यत्वमेवार्थः ; तथा च महावा-

क्यजन्यधीकालीनस्य शोधकवाक्यजन्यज्ञानस्योक्तसंबन्धेन महावाक्यविशिष्टत्वेन तदन्यत्वाभावात् व्यावृत्तिरित्याशङ्क्याकरणम् । तदप्ययुक्तम् तत्रापि उत्तरत्वमात्रनिवेशेनैवोपपत्तौ अव्यवहितत्वनिवेशनस्य व्यर्थत्वात् । अव्यवहितत्वमात्रनिवेशे महावाक्यज्ञानाव्यवहितपूर्वजातेन शुक्त्याद्यवच्छिन्नचैतन्यविषयकज्ञानेन यादृशशुक्तिरजतादेः निवृत्तिः तादृशरजतादेः निरुक्ताव्यवहितत्वसम्बन्धेन महावाक्यविशिष्टान्यत् यज्ज्ञानं उक्ताधेयतासम्बन्धेन तद्विशिष्टान्यतया सिद्धसाधनात् तद्द्वारकतया उत्तरत्वनिवेशसार्थक्येऽपि उत्तरत्वनिवेशानन्तरं अव्यवहितत्वस्य सिद्धसाधनाद्यवारकत्वात् । किंच महावाक्यज्ञानानन्तरं प्रतिबन्धकान्तरवशात् यत्र न निर्विकल्पकोत्पत्तिः अपि तु सामग्र्यन्तरवशाच्छुक्त्यादिज्ञानमेव तत्र तादृशशुक्त्यादिज्ञानाध्ये रजतादौ सिद्धसाधनं दुर्वारम् । न च प्रतिबन्धकाभावविशिष्टमहावाक्यविशिष्टान्यत्वमेव निवेश्यत इति वाच्यम् , प्रतिबन्धकत्वस्यानुगतत्वात् तत्कार्यप्रतिबन्धकत्वेनैव निवेशनीयतया प्रकृते महावाक्यजन्यज्ञानप्रतिबन्धकाभावविशिष्टमहावाक्यविशिष्टान्यत्वस्यैव निवेशनीयतया अप्रामाण्यज्ञानस्य स्वातन्त्र्येण प्रतिबन्धकत्वपक्षे यत्रैकविधमहावाक्यनिष्ठानु-

पूर्वाविषयकज्ञानं महावाक्यान्तरनिष्ठानुपूर्व्यभाववति तादृशानुपूर्वीप्रकारकमिति स्वांशे अप्रामाण्यावगाहि, तदुत्तरं जायमानाद्वितीयब्रह्मविषयकनिर्विकल्पकस्य सामान्यतो महावाक्यजन्यज्ञानप्रतिबन्धकाभावविशिष्टमहावाक्यविशिष्टान्यतया तद्बाध्यत्वस्य प्रपंचे सत्वेनाश्रयासिद्धेः ॥ अपि च महावाक्यस्य महावाक्यज्ञानस्य वा पदयोः सामानाधिकरण्यज्ञानादिना व्यवहितत्वेन अव्यवहितोत्तरत्वसंबन्धेन तद्विशिष्टान्यतया महावाक्यप्रयोज्यनिर्विकल्पकसामान्यस्य तद्बाध्ये जगत्याश्रयासिद्धेः जागरूकत्वात् । अथैवमपि अखण्डाकारब्रह्मज्ञानबाध्ये तदव्यवहितपूर्ववृत्तिप्रातिभासिकविशेषे सिद्धसाधनं दुर्वारमेवेति चेत् न अबाध्येत्यनेन ध्वंसः निरुक्तज्ञानं चेत्यन्यतरजन्यध्वंसप्रतियोग्यज्ञानप्रयुक्तान्यत्वस्य विवक्षितत्वात् । परैः भ्रमजनकाज्ञानस्य अनिर्वाच्यत्वानभ्युपगमाच्च उक्तविशेषणस्य तत्साधारण्यं न दोषाय भवति, अनिर्वाच्यत्वस्य साध्यत्वे । ज्ञाननिवर्त्यत्वस्य साध्यत्वे तु उक्तान्यतरजन्यध्वंसप्रतियोग्यज्ञानभिन्नत्वमपि पक्षतावच्छेदकेऽनुप्रवेशनीयमिति न शुक्तिरजताद्युपादानभूताज्ञाने सिद्धसाधनं, जीवेशभेदाश्रयनादिपदार्थानां पक्षबहिर्भावापत्तिवारणाय च प्रतियोगिकोटावज्ञानत्वस्य

निवेशः उक्तप्रातिभासिकोपादानभूताज्ञानं च निरुक्तान्यतरान्तर्गतध्वंसजन्यनाशप्रतियोग्येवेति न तत्रापि सिद्धसाधनम् ॥ ब्रह्मज्ञानस्य तदसमानविषयकतया तन्नाश्यत्वासंभवेन मूलाज्ञाननाशनाश्यताया एवाङ्गीकारात् । न चैवं अज्ञानस्य स्वसमानविषयकज्ञाननाश्यत्वनियमव्याघात इति वाच्यम् । तादृशप्रातिभासिकविशेषस्य प्रामाणिकत्वे, उक्तरीत्या व्यभिचारवारणाय तदज्ञानान्यत्वस्यापि नाश्यतावच्छेदकनिवेशेन व्यभिचारानवकाशात् । यदि च ज्ञानस्यापि स्वप्रागभावध्वंसरूपतया मूलाज्ञानस्य ज्ञानात्मकध्वंसजन्यनाशप्रतियोगितया उक्तान्यतरजन्यनाशप्रतियोग्यज्ञानाभिन्नत्वविरहेण पक्षबहिर्भावापत्तिरिति विभाव्यते, तदा ज्ञानान्यध्वंस एवात्रत्यध्वंसपदेन विवक्षणीयः ॥ अथवा उक्तब्रह्मविषयताशून्यधीजन्यत्वध्वंसत्वावच्छिन्नजनकतानिरूपितजन्यतावत्वान्यतरवन्नाशप्रतियोग्यज्ञानतत्प्रयुक्तान्यत्वस्य अबाध्यान्तेन विवक्षणीयतया दोषाभावात् । यत्तु एवमपि उक्तप्रातिभासिके सिद्धसाधनं दुर्वारं, ज्ञानेनाज्ञानध्वंसस्य तादृशाज्ञानध्वंसेन दृश्यान्तरध्वंसस्य च भवतां मते अनङ्गीकारात् । तथासति तत्त्वज्ञानजन्यस्य अविद्याध्वंसस्य तादृशध्वंसजन्यस्य दृश्यान्तरध्वंसस्य च नाशकाभावेन मुक्तौ तयोः परिशे-

षापत्या "विद्वान्नामरूपाद्विमुक्त." इत्यादिश्रुतिबाधापत्तेः। ध्वंससामान्यस्यैव चानङ्गीकारे आश्रयासिद्धिरिति तन्न, अज्ञानध्वंसस्य च ब्रह्मस्वरूपातिरिक्तस्यास्मन्मते अनङ्गीकारेऽपि ब्रह्मस्वरूपयोः तयोरङ्गीकारात्। न च ब्रह्मस्वरूपयोः तयोरङ्गीकारेऽपि ब्रह्मस्वरूपस्य शुद्धस्य नित्यतया अज्ञानध्वंसजन्यत्वं दृश्यान्तरध्वंसस्यानुपपन्नमेवेति वाच्यम्॥ स्वरूपस्य नित्यत्वेऽपि उपहितरूपस्यानित्यतया दृश्यान्तरध्वंसत्वोपहितस्याज्ञानध्वंसत्वोपहितजन्यत्वे बाधकाभावात्। न च निरुक्तोपहितरूपस्यैव तत्त्वज्ञानोत्तरकालीनस्यानिवृत्त्या "विद्वान्नामरूपाद्विमुक्तः" इत्यादिश्रुत्यर्थबाधो दुर्वार एवेति वाच्यम्॥ तादृशोपहितरूपस्यापि स्वप्रतियोगिकत्वेन क्षणिकतया तदुत्तरं तस्याननुवृत्तेः। न चैवं लघुचन्द्रिकायां "मिथ्याबन्धविधूननेन" "विकल्पोज्झित" इत्यद्वैतसिद्धिश्लोकव्याख्यायां तृतीयायाः ज्ञापकहेतुत्वमेव न कारकहेतुत्वमिति व्यवस्थापनस्यासङ्गतिरिति वाच्यम्। तादृशग्रन्थस्य निरुक्तोपहितरूपयोरपि प्रयोज्यप्रयोजकभावो नाङ्गीक्रियते, किं तु विद्यावतः क्षणस्य अविद्यातत्प्रयुक्तदृश्याश्रयकालपूर्वत्वाभाव इति नियममात्रमेवेति तत्पक्षाभिप्रायकत्वे-

नादोषात् ॥ तदिदं सर्वं गुरुचन्द्रिकाशास्त्रारम्भसमर्थन-माष्यभानुप्रभादिमूलकम् । उक्तं च गुरुचन्द्रिकायां आधार एव ध्वंसः प्रतियोग्येव प्रागभावस्य स इति तयोः अज्ञानादिध्वंसत्वेन प्रयुक्तत्वस्य स्वस्यैव स्वप्रागभावध्वंसत्वेन प्रयुक्तत्वस्य च स्वीकारात् । उत्तरज्ञानादज्ञानध्वंसः स्वस्मात्स्वप्रागभावनाश इति प्रत्ययात् । एकमेव ध्वंसत्वं स्वपरसाधारणसकलदृश्यप्रतियोगितानिरूपकमिति ध्वंसान्तरास्वीकारात् अनवस्था नाशंक्या, दृश्यप्रतियोगितात्वेन निरूप्यत्वात् न आत्माश्रय इति । अज्ञानध्वंसादितरध्वंसोत्पत्त्यङ्गीकारे अज्ञानध्वंसप्रयुक्तध्वंसप्रतियोगितादात्म्यं तदिति च । अत एव च " निवृत्तिरात्मा मोहस्य " इत्यादिवार्तिकमपि साधु सङ्गच्छते । अत एव हरिमीडास्तवे ब्रह्मणो ध्वान्तविनाशत्वमुपपादितम् । यदि च चरमक्षणे स्वेतरस्येव स्वस्यापि ध्वंसत्वं स्वीक्रियते एकत्रापि तत्र रूपभेदेन ध्वंसप्रतियोगित्वानुयोगित्वयोः सम्भवात् । सकलदृश्यत्वेन हि तत्र प्रतियोगित्वं चरमतत्त्वज्ञानाश्रयतत्क्षणव्यक्तित्वेनानुयोगित्वम् । घटाभावे स नास्तीत्यादिप्रत्ययबलेनाश्रमस्वामिनां मते घटाभावादिप्रतियोग्यनुयोगिकस्यात्यन्ताभावस्यवेज्ञानात्सर्वं दृश्यं नष्टमित्यादिप्रत्ययबलेन सर्वदृश्यप्रतियो-

गिकस्य चरमक्षणानुयोगिकस्य ध्वंसस्य सम्भवादिति। ज्ञाननिवर्त्यत्वानुमाने लघुचन्द्रिकायां द्वितीयव्याख्यानोक्तपक्षाश्रयणे तत्रापि वार्तिककृदुक्त

"तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्यमात्रतः।
अविद्या सहकार्येण नासीदस्ति भविष्यति" इति

कारिकायां अज्ञानप्रयुक्तसाहित्यम्याज्ञाने कथनात् अज्ञानस्य निवृत्तिक्रियायां प्राधान्यलाभेन तदनुरोधेन चरमतत्त्वज्ञानाश्रयप्रथमक्षणे अज्ञाननाशः, तदाश्रयद्वितीयक्षणस्य च स्वस्वेतरपूर्वोत्पन्नाज्ञाननाशादिदृश्यप्रतियोगिकध्वंसस्यैवाङ्गीकार्यतया तदापि न काचिदनुपपत्तिः। यदि पञ्चमप्रकाराऽविद्यानिवृत्तिः सा च तत्त्वज्ञानसाध्या स्थिरा चेति मण्डनमतमाश्रीयते, तदा तु नानुपपत्तिलेशोऽपि। यदि च विद्यावतः क्षणस्याविद्याश्रयत्वाभावः; एवं विद्यावतः क्षणस्याविद्याप्रयुक्ताश्रयकालपूर्वत्वाभावः इति नियमद्वयमेव; न त्वज्ञानध्वंसत्वं तत्प्रयुक्तध्वंसत्वं वा; ब्रह्मणः, तत्त्वज्ञानाधिकरणक्षणस्य वा अङ्गीक्रियत इति ज्ञाननिवर्त्यत्वानुमाने प्रथमव्याख्योक्तपक्षेऽपि निरुक्तप्रातिभासिके सिद्धसाधनं वारणीयमित्याग्रहः, तदा जीवत्वब्रह्मत्वाद्युप-

लक्षितब्रह्मविषयताशून्यज्ञानजन्यध्वंसप्रतियोगित्व अप्रामाण्यज्ञानानास्कन्दितजीवत्वब्रह्मत्वाद्युपलक्षितब्रह्मविषयताशालिज्ञानवत्क्षणवृत्तित्वान्यतरवदज्ञानतत्प्रयुक्तान्यत्वं निवेशनीयम् ॥ तथा च सति न निरुक्तब्रह्मज्ञानाव्यवहितपूर्वोत्पन्नप्रातिभाधिके सिद्धसाधनं, तत्प्रयोजकीभूताज्ञानस्य निरुक्तब्रह्मज्ञानासमानविषयकतया तदधिकरणक्षणवृत्तित्वेन निरुक्तविषयताशून्यज्ञानजन्यध्वंसप्रतियोगित्वविरहेऽपि निरुक्तक्षणवृत्तित्वान्यतरवत्त्वेन निरुक्तान्यतरवदज्ञानप्रयुक्तत्वेन च तदन्यत्वाभावात्। तदयं निर्गलितार्थः गगनाभावविशिष्टत्वं वैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन, स्वनिष्ठावच्छेदकता च स्वविशिष्टज्ञानविशिष्टाज्ञानविशिष्टत्वसम्बन्धेन, ज्ञाने स्ववैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन ; स्वनिष्ठावच्छेदकता च स्वविशिष्टब्रह्मविषयतावत्त्वसम्बन्धेन ; ब्रह्मविषयतायां स्ववैशिष्ट्यं च स्वाश्रयजीवत्वविशिष्टत्वस्वाश्रयब्रह्मत्वविशिष्टत्वोभयसम्बन्धेन जीवत्ववैशिष्ट्यं च स्वाविषयकज्ञाननिरूपितत्वस्वावच्छिन्नत्वोभयसम्बन्धेन ; ब्रह्मत्ववैशिष्ट्यमप्येनैव सम्बन्धेन ; ज्ञानवैशिष्ट्यं चाज्ञाने स्वजन्यध्वंसप्रतियोगित्वस्वविशिष्टक्षणवृत्तित्वान्यतरसम्बन्धेन ; क्षणे स्ववै-

शिष्टत्वं च स्वसमानकालीनाप्रामाण्यज्ञानानास्कन्दितजीवत्वब्रह्मत्वोभयविशिष्टविषयताशालिज्ञानादिकरणत्वसम्बन्धेन अत्रापि जीवत्वब्रह्मत्वादिवैशिष्ट्यं पूर्ववत्। अज्ञानवैशिष्ट्यं च तादात्म्यप्रयुक्तत्वान्यतरसम्बन्धेनेति ॥

सत्वेन प्रतीत्यर्हत्वमपि सत्तादात्म्यपर्यवसितम्। नन्वेवद्विशेषणं व्यर्थं असति बाधावारणार्थं हि तन्निवेशनीयम् न चैतद्युज्यते असतः ख्यात्यनङ्गीकारात्। तदङ्गीकारेऽपि भवन्मतेऽत्यन्ताभावस्य केवलान्वयितया कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्याभावे कारणत्वानुपपत्त्या दुर्निरूपत्वेन कारणतावच्छेदकशक्तिविशेषनाशकत्वरूपस्यैव तस्याङ्गीकरणीयतया तदनुरोधेन पक्षे साध्यवैशिष्ट्यावगाह्यनुमितिनिरूपिताज्ञाननिष्ठजनकतावच्छेदकशक्तिनाशकता, तादृशानुमितिप्रयोजकाज्ञाननाशकता वा यादृशविशिष्टविषयकत्वावच्छिन्ना तादृशविशिष्टत्वमेव बाधत्वमित्यङ्गीकार्यतया असद्विषयकाज्ञानस्य सिद्धान्तेऽनङ्गीकारेण मिथ्यात्वाभाववदसद्विषयकविकल्पाख्यवृत्तेरज्ञाननाशकत्वाभावेन मिथ्यात्वाभाववदसतो बाधत्वासम्भवात्। न च कारणीभूताभावप्रतियोगित्वमेव प्रतिबन्धकत्वं सुवचं मिथ्यात्वघटकस्य पारमार्थिकात्यन्ताभावस्य केवलान्वयित्वे-

ऽपि अतथाभूतस्य व्यावहारिकाभावस्य केवलान्वयित्वे प्रमाणाभावात् इति मिथ्यात्वाभाववदसतो बाधत्वं सुवचमेवेति वाच्यम् । तथासति पर्वतो वन्हिमान् इत्यादौ प्रातिभासिकवन्ह्यभाववत्पर्वतादेरपि दोषतापत्तेः । तत्रापि प्रातिभासिकवन्ह्यभावव्यावहारिकपर्वतत्वोभयस्य यद्रूपपदार्थत्वसम्भवात् । न च ब्रह्मान्यज्ञाननिवर्त्यविषयकत्वं निश्चये निवेश्य तद्वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतेत्यादिनिवेशान्नैष दोष इति वाच्यम् । तथा सति प्रातिभासिकरजतादिपक्षकसत्यत्वादिसाध्यकस्थले बाधानापत्तेः । न चेष्टापत्तिः । तत्साध्यकप्रातिभासिकत्वरूपहेत्वादेः सद्धेतुत्वापत्तेः । सद्धेत्वसद्धेतूभयविलक्षणहेतुश्च न कस्यापि तान्त्रिकस्यानुमतः ॥ यत्तु यद्रूपावच्छिन्नविषयिताव्यापिकाप्रकृतानुमितिप्रतिबन्धकता स्वसमानसत्ताकतद्रूपवत्त्वस्य विवक्षणेन प्रातिभासिकवन्ह्यभाववत्पर्वते अतिव्याप्तिवारणम् । तत्तुच्छम् , प्रातिभासिकपक्षकस्थले बाधासम्भवात् । ब्रह्मपक्षकमिथ्यात्वसाध्यकस्थले बाधासम्भवाच्चेति चेन्न यथा तान्त्रिकमतेऽपि यद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितिप्रतिबन्धकतेति निवेशे यत्रासद्धेतुविशेषे अनुमितेरेवाप्रसिद्धिः यथा "निर्वन्हिः पर्वतो वन्हिमान्"

"निर्वन्हिः वन्हिमान्" इत्यादौ तत्राव्याप्त्या यादृशपक्षक-यादृशसाध्यकयादृशहेतुकस्थले यावन्तो दोषाः सम्भवन्ति तावदन्यतमत्वस्यैव निवेशनीयता, तथा सिद्धान्तेऽपि निर्वन्हिः वन्हिमान् इत्यादिवृत्तेरेवाप्रसिद्धतया प्रसिद्धत्वेऽपि तस्याः ज्ञानत्वाभावेन सुतरां तव्याप्यानुमितित्वादेः तत्रासम्भवेनानुमित्यप्रसिद्धिनिबन्धनाव्याप्तेः तुल्यत्वेन यादृशपक्षकेत्यादिरीतेरेवादरणीयत्वेन साध्याभाववदसतो बाधत्वस्य स्वरूपादत्वात्। अनुसृतापि च एतादृश्येव रीतिः प्रमाणतत्त्वविवेकादौ भट्टैरम्बकैरिति। एतेन ब्रह्मणि बाधवारणाय चिद्भिन्नत्वनिवेशनमपि व्यर्थं, शुद्धस्य ज्ञानाविषयत्वपक्षे बाधलक्षणासम्भवादित्यपि परास्तम्। लक्षणासम्भवसम्भवयोः वस्तुतः दोषत्वतदभावयोरप्रयोजकत्वाच्च॥ यदपि ब्रह्मणि प्रातिभासिकचिद्भेदस्य सत्त्वेन बाधावारणात् स्वसमानसत्ताकचिद्भेदस्यैव निवेशनीयतया असति कस्या अपि सत्तायां अभावेन तत एव असत्यपि बाधवारणसम्भवेन सत्तादार्ढ्यं व्यर्थमेवेति। तदपि न, सत्तावैविध्यपक्षे तथानिवेशसम्भवेऽपि तदनङ्गीकारपक्षे तदसम्भवेन व्यावहारिकत्वस्यैव भेदे निवेशनीयतया असन्निष्ठभेदस्यापि व्यावहारिकतया असति बाधावश्यकतया तद्वारकतयैव सत्ता-

दात्म्यसार्थक्यसम्भवात् । उभयकल्पेऽपि सम्भवत्पक्षादरस्यैव उचितत्वात् । यद्यपि ब्रह्मतादात्म्यरूपस्य भवदभिमतसत्तादात्म्यस्य सत्यत्ववादिमते प्रपञ्चे अस्वीकारेण तादृशविशेषणोपादानस्य सन्दिग्धासिद्धिसम्पादकत्वमिति । तन्न, भास्करानुयायिना विवाद एव अस्यापि पक्षतावच्छेदकघटकत्वेन दोषाभावात् । यच्च प्रातिभासिकव्यावृत्तरूपेण पक्षतावच्छेदककोटौ सत्तादात्म्यनिवेशेनैव प्रातिभासिकसत्तादात्म्यतः प्रातिभासिकस्य व्यावर्तनात् ब्रह्मप्रमेत्यादिविशेषणवैयर्थ्यम् । भवन्मते सत्तादात्म्यत्वघटत्वपटत्वादिकं हि त्रिविधं, प्रातिभासिकमात्रवृत्ति व्यावहारिकमात्रवृत्ति तदुभयसाधारणं चेति, एवं चोभयसाधारणसत्तादात्म्यत्वेन सत्तादात्म्यं सिद्धस्य प्रातिभासिके सिद्धसाधनसम्पादनस्य तद्वारकविशेषणान्तरोपादानस्य च प्रक्षालनाद्धीति न्यायाक्रान्तत्वादिति तदपि न, व्यावहारिकनिष्ठं रजतत्वादिकं प्रातीतिके रजतादौ न स्वीक्रियते प्रातीतिकादपि व्यावहारिकरजतादिकार्यापत्तेः । प्रथमपरिच्छेदान्ते मूले प्रातीतिकव्यावहारिकसाधारणमेकं रजतत्वादिकं, व्यावहारिकमात्रेऽन्यत् प्रातीतिकमात्रे अन्यदित्युक्तिस्तु व्यावहारिकरजततादात्म्यस्य प्रातीतिकस्य प्रातीतिकेऽनङ्गीकारपक्षे प्रौढिवाद-

मात्रेण, एकस्यैव रजतत्वस्य व्यावहारिकस्य व्यावहारिक-मात्रनिष्ठस्य स्वीकारेऽपि तदाश्रयतादात्म्यविशिष्टस्य उत्पत्या तादृशतादात्म्यस्योत्पत्तेः इदं रजतमिति व्यवहारोपपत्तेरिति लघुचन्द्रिकायामुक्तप्राचीनमते व्यावहारिकमात्रवृत्ति-तादात्म्यत्वेन सत्तादात्म्यस्य निवेशेन प्रातिभासिकरजतवा-रणासम्भवात्, रजतत्वादिस्थल इव तादात्म्यत्वस्थलेऽपि व्यावहारिकतादात्म्यत्वविशिष्टतादात्म्यस्यैवोत्पत्तेरभ्युपगन्त-व्यतया व्यावहारिकतादात्म्यत्वसंसर्गस्याप्युत्पत्त्यावश्यक-तया व्यावहारिकतादात्म्यत्वविशिष्टस्य प्रातीतिकस्यैव सं-भवात्। तत्र सत्तादात्म्यत्ववैशिष्ट्यघटकसम्बन्धे व्यावहा-रिकत्वनिवेशने तु तदपेक्षया ब्रह्मप्रमेत्यादि विशेषणस्यैव लघु-त्वेन न्याय्यत्वात्। लघुचन्द्रिकायां तत्रैव यदित्यादिना उक्तनव्यमते तथा निवेशेन प्रतिभासिकवारणेऽपि उभय-पक्षेऽपि सम्भवत्पक्षादेरौचित्यस्यासकृदावेदितत्वात्। यत्तु उभयसाधारणसत्तादात्म्यत्वेन सत्तादात्म्यनिवेशे न तुच्छ-व्यावृत्तिः, शशविषाणं सदितिभ्रमसम्भवेन शशविषाणा-दावपि प्रातीतिकसत्तादात्म्यसम्भवादिति तन्न शशविषाण-शब्देनासतोऽनुपस्थापनात्। तथाहि किमळीकं शशश-ब्दार्थः शृङ्गशब्दार्थः समासार्थो वा नाद्यद्वितीयौ पदा-

न्तरवैयर्थ्यापातात् । वाच्यतावच्छेदकानिरूपणाच्च । शशी-यत्वसमानाधिकरणशृङ्गत्वादिकं अळीकत्वान्नतथा । प्रवृत्ति-विषयवृत्तेरेव तथात्वात् । नाप्यखण्डधर्मान्तरं शब्दादन्यतः तस्य प्रतीत्यभावेन शब्दादेव तत्प्रतीतेर्वक्तव्यतया समयग्रहार्थं शब्दान्तरापेक्षापरम्परायां अनवस्थाप्रसङ्गात् । विशेषदर्शिनां एतादृशवाक्यजन्यप्रतीत्युत्तरं शृङ्गं शशीयं नेति बुध्यापत्तेश्च । न ह्यसति विशेषदर्शने गोर्भृङ्गं सदिति प्रत्ययात् एतादृशप्रत्ययस्य स्वविरोधिज्ञानप्रतिबन्धादिरूपकार्यनिर्वाहकतायां अस्ति मनागपि विशेषः । अन्यथा अनुभवविरुद्धकल्पनापत्तेः । अथोच्येत शशीयत्वशृङ्गत्वाभ्यां अळीकं प्रतीयत इति तन्न ; असत्ख्यातिविलोपापत्तेः । अत एव न तृतीयः शृङ्गं शशीयमित्यादौ सत्यभावाच्च । न चैतद्विकल्पविषयः सन् इत्यादिप्रतीत्या असति प्रातीतिकसत्तादात्म्यं सम्भवति, असति विषयत्वादेः धर्मस्य लघुचन्द्रिकादिष्वङ्गीकारात् , तादृशविकल्पविषयत्वस्य प्रसिद्ध्या तस्यैव समासवाच्यतावच्छेदकतासम्भवादिति वाच्यम् । तावतापि अनुयोगिरूपेण परिणममानाविद्याया एव तन्निष्ठसत्तादात्म्यरूपेण परिणममानत्वनियमात् । अळीकरूपेणाविद्याया अपरिणममानत्वात् तन्निष्ठसत्तादात्म्यरूपेणापि

परिणामासम्भवात् । न च सत्प्रतियोगिकतादात्म्य-स्योक्तनियमस्वीकारेणाळीकावृत्तित्वेऽपि सदनुयोगिकाळीक-प्रतियोगिकतादात्म्यस्यासत्साधारण्ये क्षतिविरह इति वाच्यम् । सदळीकमिति प्रतीत्यभावेनाविद्यायाः तादृश-परिणामे हेतुत्वाकल्पनात् । किं च सत्प्रातियोगिकतादा-त्म्यस्यैव प्रकृते पक्षतावच्छेदकघटकत्वात् अळीकप्रति-योगिकतादात्म्यस्यासत्साधारण्येऽपि क्षतिविरहात् । यत्तु अनुयोगितासम्बन्धेन सत्प्रतियोगिकतादात्म्यस्य पक्षता-वच्छेदकघटकत्वेनैव ब्रह्मणि बाधवारणे चिद्भिन्नत्व-विशेषणं व्यर्थम् ; स्वस्मिन् स्वप्रतियोगिकतादात्म्यानुयोगि-त्वाभावात् प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन घटकतां स्वीकृत्य ब्रह्मणि (ब्रह्म) बाधं सम्पाद्य चिद्भिन्नत्वनिवेशनं प्रक्षालनाद्धीतिन्यायग्रस्तामिति तन्न , सत्प्रतियोगिकतादा-त्म्यस्य सम्बन्धसामान्येन पक्षतावच्छेदकघटकतायामेव चिद्भिन्नत्वविशेषणस्योपादानात् स्वबुद्धिपरिकल्पितविशेषणा-न्तरं प्रक्षिप्य यत्र कुत्राचिद्वैयर्थ्योपपादनस्य सर्वत्र सम्भवेन अस्य वैयर्थ्यपदार्थत्वासम्भवात् । अनुयोगितासम्बन्धस्य पक्षतावच्छेदकताघटकत्वे चिद्भिन्नत्वं न देयमित्यपि लघु-चन्द्रिकायामुक्तमिति अस्याकिञ्चित्करत्वाच्च । ननु सत्प्रति-

योगिकतादात्म्यनिवेशे आश्रयासिद्धिः इदंपदार्थे रजतस्येव ब्रह्मणि दृश्यमात्रस्याध्यस्तत्वेन दृश्यतादात्म्यस्य ब्रह्मणि रजततादात्म्यस्येदमीव सिद्धत्वेऽपि दृश्यमात्रे ब्रह्मणोऽनध्यासात् सत्तादात्म्यस्य तत्र स्वीकारे प्रमाणाभावादिति चेन्न इदं रजतम्, रजतं इदं इति व्यवसाययोः भेदावश्यकतया तयोर्भेदस्य विभिन्नविषयकत्व एव सम्भवेन इदं रजतमिति प्रथमप्रतीतौ इदम् रजततादात्म्यं द्वितीयप्रतीतौ च रजते इदं तादात्म्यं विषयः इत्यवश्यमभ्युपेयम् । तथा घटः सन् सन् घटः इति प्रतीत्योरपि । प्रथमप्रतीतौ घटादौ सत्तादात्म्यं द्वितीयायां च सति घटादितादात्म्यं चाभ्युपेयमिति आश्रयासिद्धेरनवकाशात् । यत्तु उपनीतं विशेषणतयैव भासत इति वदद्भिः प्रथमप्रतीतेः स्वीकारेऽपि द्वितीयप्रतीतेरनङ्गीकारेण तादृशप्रतीतेरेवाप्रामाणिकतया तदसिद्धिरिति तन्न मीमांसकैः उपनयसन्निकर्षानङ्गीकारेण तन्मते एतादृशप्रतीतेरङ्गीकारस्य प्रामाणिकत्वात् । नैयायिकैः उपनयस्य सन्निकर्षत्वमङ्गीकुर्वद्भिः अलौकिक्यां विषयतायां विशेषणतात्वमात्राङ्गीकारेऽपि लौकिक्यां च विशेषणतात्वस्येव विशेष्यतात्वस्याप्यङ्गीकारेण इदं रजतमिति धीस्थले दोषाणां लौकिकविषयताप्रयोजकानां सत्वेन

द्वितीयप्रतीतेरङ्गीकाराच्च । न च विषयतावैलक्षण्येनैव ज्ञानवैलक्षण्यसम्भवे तदर्थं विलक्षणविषयकल्पनमयुक्तम् । अन्यथा घटवत् भूतलं घटभूतलसंयोगा इति ज्ञानयोः विलक्षणविषयकल्पनापत्तेः । न च प्रथमज्ञाने सम्बन्धविधया संयोगो भासते चरमज्ञाने च संयोगस्य सम्बन्धोऽपि अधिको भासत इति विषयवैलक्षण्यादेव उभयोर्वैलक्षण्यमिति युक्तम् । संयोगादिप्रतियोगिकसम्बन्धमादायापि समूहालम्बनसम्भवात् । घटवत् भूतलं संयोगश्चेति, घटभूतलसंयोगा इति ज्ञानयोर्वैलक्षण्यानुपपत्तेः । संयोगसंसर्गकविशिष्टबुद्धौ संयोगः स्वरूपत एव भासते न तु संयोगत्वेन सखण्डपदार्थस्यापि सम्बन्धविधया स्वरूपतो भानोपगमात् । उक्तसमूहालम्बने च संयोगत्वेन संयोगोऽधिको भासत इति संयोगत्वरूपाधिकपदार्थभानाभानाभ्यामेव विशेष इत्युक्तावप्यनिस्तार इति वाच्यं विशिष्टातिरिक्तताभङ्गीकुर्वाणैः घटवत् भूतलमिति ज्ञाने घटविशिष्टभूतलादेर्विषयत्वं घटभूतलसंयोगा इति समूहालम्बने केवलघटादेर्विषयत्वमिति विषयभेदेनैव तयोर्वैलक्षण्याङ्गीकारात् । किं च विषयतामात्रवैलक्षण्याज्ज्ञानवैलक्षण्यं नाभ्युपगन्तुं शक्यं तथा सति बहिर्विषयसामान्यविलोपापत्त्या साकार-

वादापत्तेः अयं घटः अयं पट इति ज्ञानानां मिथो वैलक्षण्याय हि तेषां विषयाः परस्परं भिन्नाः घटपटादिरूपाः उपगम्यन्ते । तदुक्तमुदयनाचार्यैः—

"अर्थेनैव विशेषो हि निराकारतया धियाम्" इति अर्थेन ज्ञानादत्यन्तभिन्नेन घटादिरूपेण अभिन्नो धियां विशेषः निराकारतया ज्ञानधर्मरूपाकारेण घटादिना विषयतास्थानीयेन हीनतया, तथा च घटादिकं विषयतास्थानीयं ज्ञानधर्मो ज्ञानाद्भिन्नाभिन्नतया बौद्धैर्यदुच्यते, न तथा, किं तु ज्ञानादत्यन्तभिन्न एव विषयः ज्ञानवैलक्षण्यसम्पादक इत्यवश्यं अभ्युपेयं तथा च इदं रजतं रजतमिदमिति प्रतीत्योः वैलक्षण्यस्य विषयभेदमन्तरा दुर्निरूपत्वेन सन् घटः घटः सन् इति प्रतीत्योः वैलक्षण्यनिर्वाहाय तादात्म्यद्वयं स्वीकरणीयमेव । यत्तु—विषयतावैलक्षण्याज्ज्ञानवैलक्षण्येऽपि विषयतावैलक्षण्यस्य विषयवैलक्षण्याधीनतया बहिर्विलोपापत्यनवकाशेन न बौद्धमतप्रवेशापत्तिः स्वतो व्यावृत्तविषयताकल्पनस्यैव बौद्धमतप्रवेशापादकत्वात् । अन्यथा वेदान्तिनामपि बौद्धमतप्रवेशापत्तिः स्यात् । सिद्धान्तेऽपि ज्ञानविषययोः सम्बन्धस्य विषयतारूपस्य चित्तादात्म्यस्य ज्ञानाद्भिन्नाभिन्नस्याङ्गीकारात् । ज्ञानवैलक्षण्यस्य साक्षाद्विषय-

वैलक्षण्याधीनत्वाभावेऽपि परम्परया तदधीनत्वादेव अर्थे-नैवेत्यादेरुपपत्तिसम्भवात्; निराकारतयेत्यस्यापि स्वतो व्यावृत्तविषयताशून्यतयेत्यर्थकत्वान्नोदयनाचार्यग्रन्थासङ्गतिः । न च विषयवैलक्षण्यात् विषयतावैलक्षण्यम् तद्वैलक्षण्याच्च ज्ञानवैलक्षण्यमिति प्रणालीकल्पनापेक्षया साक्षाद्विषयवैलक्षण्यादेव ज्ञानवैलक्षण्यमिति कल्पनमुचितमिति वाच्यम् । यत्र विषयवैलक्षण्यात् ज्ञानवैलक्षण्यं न सम्भवति यथा पूर्वोक्तयोः घटवद्भूतलं घटभूतलसंयोगा इति ज्ञानयोः तत्र विषयतासु विशेष्यतात्वादिकमखण्डं कल्पयित्वा तादृशविषयतावैलक्षण्यादेव ज्ञानवैलक्षण्योपपादनात् । तत्रापि विलक्षणाविषयकल्पने घटपटादिनानापदार्थविषयकसमूहालम्बनविशिष्टबुद्धिभेदेनानन्तविषयकल्पनापत्तेः । तदपेक्षया विशेष्यतात्वादेः अखण्डस्य कल्पने लाघवादिति । तन्न, स्वतो व्यावृत्तविषयतायाः कचिल्लाघवानुरोधेन कल्पने बहिर्विषयसामान्याकल्पनप्रयुक्तलाघवानुरोधेन सर्वत्रैव तथाकल्पनस्य न्याय्यतया साकारवादिबौद्धमतप्रवेशस्य निवारयितुमशक्यत्वात् अर्थाविशेषेऽपि ज्ञानवैलक्षण्याङ्गीकारे अर्थेनैवेत्येवकारासङ्गतेश्च । स्वतो व्यावृत्तविषयतां घटवद्भूतलमित्यादिज्ञानेऽङ्गीकृत्य निराकारतयेत्यस्य स्वतो व्यावृत्तविषयता-

शून्यतयेत्यर्थोपवर्णनेनाचार्यग्रन्थसङ्गमनस्य मूकोऽहमिति-वद्व्याघातसम्पादकत्वाच्च । एवं विशेष्ये विशेषणमिति रीत्या जायमानात् तत्क्षणविशिष्टघटवान् इति ज्ञानात् विशिष्टवैशिष्ट्यावगाहिनः तत्क्षणविशिष्टघटवान् इति ज्ञानस्यापि वैलक्षण्यं विशेषणनिष्ठविषयतायां विशिष्टवैशिष्ट्यावगाहिज्ञानीयायां अवच्छेदकतात्वं अखण्डं स्वीकृत्य नैयायिकादिवदुपपादयितुमशक्यमेव । क्वचिद्विषयावैलक्षण्येऽपि विषयतावैलक्षण्यात् ज्ञानवैलक्षण्यस्वीकारे सर्वत्रापि तथा कल्पनसम्भवेन साकारवादापत्तेः किन्तु विशिष्टवैशिष्ट्यज्ञाने विशिष्टस्य विषयत्वं विशेष्ये विशेषणमिति ज्ञाने च केवलस्य विषयत्वमिति रीत्या विषयवैलक्षण्यादेव तयोर्विशेषः । विशिष्टकेवलयोः भेदादिगौरवस्य प्रामाणिकत्वेनादोषत्वादित्यङ्गीकरणीयम् । यत्तु विशिष्टस्यातिरिक्तत्वे क्षणिकत्वापत्त्या बौद्धमतप्रवेशापत्तिः तत्तत्क्षणविशिष्टस्य भिन्नत्वात् । न च केवलस्य स्थिरत्वान्न दोष इति वाच्यम् । केवलरूपस्य क्षणसम्बन्धित्वे भेदापत्तेः । क्षणासम्बन्धित्वे कालसम्बन्धित्वाभावेन तुच्छत्वापत्तेः इति ; तन्न विशिष्टशुद्धयोः भेदाभेदाङ्गीकारमते विशेषणसम्बन्धस्य शुद्धे अङ्गीकारेण तत्क्षणसम्बन्धस्य शुद्धेऽपि स्वीकारेण कालसम्बन्धित्वसत्वेन तुच्छ-

त्वापत्तेरयोगात् (भावात्)। न च शुद्धस्यापि तत्क्षणसम्बन्धित्वे विशिष्टाद्भेदो न सम्भवतीति वाच्यम्। सामानाधिकरण्यप्रतीत्यादिनिर्वाहार्थं स्वीकरणीयस्य भेदस्याभेदाविरोधित्ववत् तत्क्षणविशिष्टभेदस्य तत्क्षणसम्बन्धाविरोधित्वात्। न च घटभूतलसंयोगो इति समूहालम्बनात् घटवद्भूतलमिति विशेष्ये विशेषणमिति रीत्या जायमानज्ञानस्य कथं वैलक्षण्यं ; उभयत्रापि केवलस्य विषयत्वात्। घटत्वविशिष्टवत् भूतलस्य विशिष्टवैशिष्ट्यावगाहिज्ञानमात्रविषयत्वात्। अन्यथा घटत्वविशिष्टवैशिष्ट्यावगाहिज्ञानस्य ततो वैलक्षण्यासम्भवादिति वाच्यम्। समूहालम्बनतो भेदसिद्धये विशेष्ये विशेषणमिति रीत्या जायमानज्ञाने घटोपहितभूतलादेर्विषयत्वाङ्गीकारात्। न च विशिष्टशुद्धयोर्भेदे विशिष्टसत्ता न सत्तेति प्रत्ययापत्तिरिति वाच्यम्॥ समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञ्जा अभेदविरोधित्वविशिष्टस्वरूपसंसर्गकभेदप्रकारकशाब्दबोधजनकत्वात्। असमानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञ्श्च प्रतियोगिविरोधित्वविशिष्टस्वरूपसंसर्गकाभावबोधजनकत्वात् उक्तप्रत्ययापत्तेरयोगात्॥ तादृशप्रत्ययेऽपि उक्तस्वरूपस्यैव संसर्गत्वात्। अभि-

लभ्यमानप्रतीतेरभिलापजन्यबोधसमानाकारत्वात् ॥ यत्तु एवं सति वृक्षे न कपिसंयोग इति प्रत्ययस्य भ्रमत्वापत्तिः तत्र स्वरूपसम्बन्धे प्रतियोगिविरोधाविरहात् । न च तत्रा-प्येकावच्छेदेन एकाधिकरणावृत्तित्वरूपविरोधोऽस्तीति वाच्यम् । तथाऽपि 'नेह नानास्ती'ति श्रुतिजन्यबोधस्य भ्रमत्वापत्तिर्दुर्वारैवेति । तन्न स्वसमानसत्ताकप्रतियोग्य-धिकरणवृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकात्यन्ता-भाववत्त्वविशिष्टस्वरूपस्यैव नञ्समभिव्याहारस्थले संसर्ग-तया भानोपगमेन नेह नानेत्यादिश्रुतिवाक्यजन्यबोधे प्रती-यमानस्य ब्रह्माभिन्नत्वावच्छिन्नप्रतियोगिताकाभावस्य पारमा-र्थिकत्वाङ्गीकारेण तत्प्रतियोगिनः स्वसमानसत्ताकत्वविर-हेण स्वसमानसत्ताकप्रतियोग्यधिकरणवृत्तित्वस्य व्यधिक-रणसम्बन्धतया तत्सम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताका-त्यन्ताभाववत्त्वविशिष्टस्वरूपसम्बन्धस्य संसर्गस्यावाधितत्वेन नेह नानेत्यादिश्रुतिवाक्यजन्यबोधस्य भ्रमत्वाप्रसक्तेः । भूतले घटो नास्तीत्यादौ तु स्वसमानसत्ताकप्रतियोगिनः प्रसिध्या तादृशसम्बन्धस्य समानाधिकरणसम्बन्धत्वेऽपि तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाववत्त्वस्य स्वरूप-सम्बन्धेऽबाधेन प्रमात्वोपपत्तिसम्भवात् । विशिष्टसत्ता, न,

सत्तेत्यादौ तु सत्ताभेदस्य स्वरूपसम्बन्धे तादात्म्यविरोधित्वविरहेण प्रमात्वापत्तेरयोगात् । न च भेदाभेदयोः परस्परं विरोधात् विशिष्टकेवलयोर्भेदाभेदाङ्गीकारः न युक्त इति वाच्यम् ॥

---


Sri Vani Vilas Press
Srirangam.

B
132
N8L35
19--



Lakṣmīnṛsiṃha Śāstrī
Nyāyenduśekharam

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 11 06 05 07 010 3